International Journal of Research in Economics and Social Sciences (IJRESS)
Available online at: http://euroasiapub.org
Vol. 7 Issue 8, August- 2017
ISSN(o): 2249-7382 | Impact Factor: 6.939 | Thomson Reuters Researcher ID: L-5236-2015

# ऐतिहासिकवेदव्याख्यापद्धतिः-एकमपग्रथनात्मकपठनम्

**हरीष् के पि**

**(शोधच्छात्रः, संस्कृतविभागः, कालिक्कट् विश्वविद्यालयः,)**

प्रस्तावना

वैदिकसूक्तानां यथातत्त्वमवगमार्थं विविधानां व्याख्यापद्धतीनामाविर्भावः पुरातनकाल एव अभवत् । ताः पद्धतयः तदनुसृतव्याख्याश्च वेदकुतुकिनां पण्डितानां कृते वेदार्थानामौचित्यनिर्णये स्वीकारे च संवर्धिकाः समजायन्त । एवं नैरुक्तयाज्ञिकैतिहासिकाध्यात्मिकाधिभौतिकाधिदैविकादिव्याख्याः वेदभाष्यकारैः कृताः ।

## वेदव्याख्यायाः विविधपद्धतयः

वेदार्थनिर्णये ऐतिहासिकः याज्ञिकः नैरुक्तश्चेति त्रयः सम्प्रदायाः मुख्याः वर्तन्ते। नैरुक्ताः प्राकृतिकविषयानधिकृत्य पदानां निर्वचनसोपानानि प्रदर्श्य वेदमन्त्राणां भाष्याणि रचितवन्तः । याज्ञिकास्तु मन्त्रान् यज्ञानुगुणेन मार्गेण व्याख्यातवन्तः । एते भवन्ति वेदव्याख्यासाम्प्रदायिकेषु समधिकस्वीकार्याः प्रबलाश्च । ऐतिहासिकाः इतिहासेषु वर्णितानां पात्राणां वृत्तान्तानां च अनुसारेण सूक्तानां व्याख्यां कृतवन्तः । तथापि निरुक्तकारस्य यास्कस्य परामर्शैः ज्ञायते यत् तदानीन्तनकाल एव वैयाकरणाः, परिव्राजकाः , नैदानाश्चेति इतरेऽपि साम्प्रदायिकाः वेदपरिचिन्तने निरताः आसन्निति[1]। आधिदैविकपद्धतिः , आधिभौतिकपद्धतिः, आध्यात्मिकपद्धतिश्चेत्यनन्तरकालीनव्याख्यापद्धतयः। एवञ्चेदपि पूर्वोक्तेभ्यः मुख्यत्रयपद्धतिभ्यः अन्यासां नैरन्तर्येण तत्पारतन्त्र्यं स्पष्टम् । अर्वाचीनानां पाश्चात्यविदुषां वैदिकसाहित्यपठने समागतमौत्सुक्यं तारतम्यैतिहासशास्त्रं तारतम्यभाषाशास्त्रञ्चेति नूतनविज्ञानशाखयोः उद्भवे हेतुरभवत् । किन्तु एताभ्यां व्याख्यायोग्याः वेदमन्त्रगतशब्दाः साम्प्रदायिकपद्धत्यपेक्षया शुष्कसङ्ख्याकाः भवन्तीति विदुषां मतम् ।

## ऐतिहासिकव्याख्यापद्धतेः विकासः

ऐतिहासिकव्याख्यासम्प्रदायस्य ऐतिह्येन वा इतिहाससाहित्येन सह सम्बन्धः वर्तते । अस्य साहित्यस्य प्रभवः वेदादेवेति वक्तुमुचितम्। यतो हि प्रथमतया वेदसूक्तानां स्वभावः, तत्सम्बद्धानां देवतानां वृत्तान्तानां च विषयश्चेत्येतद्द्वयं ऐतिह्यसम्भावनायां मुख्यं कारणमस्ति। अयं कार्यकारणसम्बन्ध एव वेदव्याख्याने ऐतिहासिकरीतिमवलम्बितुं भाष्यकाराणां चोदकत्वेन परिणतम्।

सूक्तानि अविच्छिन्नस्वरूपेण न दृश्यन्ते वेदे । मन्त्रद्रष्टॄणामृषीणां नानात्वं, सूक्तानां मन्त्राणां च वैविध्यता, तेषामनेककालनिर्वृत्तसङ्ग्रहत्वञ्चेति तद्धेतुभूतानि। अनेनैव कारणेनैतेषां सूक्तानामर्थपरिचायनं व्याख्यातृभिः सुकरं नाभवत् । एवं व्याख्यानसामग्र्यं प्राप्तुं मार्गाः बहवः स्वीकृतवन्तस्ते । तत्रैका भवति ऐतिहासिकवेदव्याख्यापद्धतिः ।

ऐतिहासिकाः नाम इतिहासविद इति 'आख्यानाख्यायिकेतिहासपुराणेभ्यश्च' इति पाणिनीयसूत्रेण समर्थयति निरुक्तव्याख्याकारः दुर्गाचार्यः [२]। इतिहास इति नाम्ना प्रसिद्धं साहित्यमेकं ब्राह्मणसाहित्यवत् तत्पूर्वमेव प्रचलन्ति स्म। अथ च तस्मात्साहित्यादुद्धृताः कथाः एव ब्राह्मणेषु कीर्णाः उपलभ्यन्ते इति पण्डितानामेकेषामभिप्रायः । तेषु प्रथमगणनीयः भवति डॉ.एमिल् सीग् महाशयः । असौ यूरोपीयपण्डितः स्वस्य - इति अपूर्णग्रन्थे वैदिकेतिहासपारम्पर्यमधिकृत्य गभीररूपेणानुसन्धानं कृत्वा शाङ्र्ग-श्यावाश्व-आत्रेय-वृषाजन-वामदेवगौतम-अगस्त्य-देवापिशान्तनूनामितिहासेषु नैकान् विशिष्टनिरीक्षणान् प्रदत्तवानिति रामगोपालमहाशयः स्मारयति [३]। तथापि निश्चयरूपेण इतिहाससाहित्यस्थापनाय पर्याप्तानां प्रमाणानामभावादुपलब्धेषु वेदार्थप्रकाशकेषु साहित्येषु पुरातनतमानि ऐतिहासिकव्याख्योपकारकाणि च भवन्ति ब्राह्मणानि । तत्र वर्णिताः कथाः इतिहासाः वा वेदभाष्योपकारकाः । वेदसंग्रहानन्तरकाले रचितेषु वैदिकसाहित्येषु अन्येष्वपि एते इतिहासाः अनेकरूपेण समुपलब्धाः । येषां साहाय्येन वैदिकसूक्तानां अन्वर्थकता सरलमार्गेण सम्पादयितुं शक्यमित्यत एव ते ऐतिहासिकव्याख्यापथस्य आधारभूताः अभवन्। एवं वेदव्याख्यातृभिः तत्रापि ऋग्वेदव्याख्यातृभिः तत्तत्सूक्तसंबन्धानितिहासान् स्वीकृत्य मन्त्राणामर्थान् सन्दर्भांश्च विशदीकर्तुं प्रयत्नः कृतः । इयमेव ऐतिहासिकव्याख्यापद्धतिः ।

ऐतिहासिकरीत्या व्याख्यानाय समुपलब्धानि निदानानि पुरातनतमानि पूर्वोक्तवत् ब्राह्मणेषु वर्तन्ते। तत्रापि कृष्णयजुर्वेदीयब्राह्मणभागेषु , तैत्तिरीयब्राह्मणे ,शतपथब्राह्मणे ,जैमिनीयब्राह्मणे ,सात्यायनब्राह्मणे च वेदसम्बद्धानि इतिहासाख्यानानि समुपलभ्यन्ते । यास्कचार्यस्य ***निरुक्तं***, ***शौनकीयबृहद्देवता*** [४], महाभारतं , द्याद्विवेदस्य ***नीतिमञ्जरी***,कात्यायनस्य ***सर्वानुक्रमणी*** च वैदिकर्षीणां देवतानां राज्ञां नदीनां पर्वतानां प्रदेशानां मन्त्रदर्शनसन्दर्भाणां च विषये प्रचलितकथानां भाण्डागाराः भवन्ति । तेषु यास्काचार्यस्य निरुक्तं अर्वाचीनवैदिकसाहित्यकालगणनानुकूलं सत् अतिरिच्यते । अयं ग्रन्थः न केवलं वेदमन्त्राणां व्याख्यास्वरूपेण वर्तते अपि तु पश्चात्कालीनवेदभाष्याणां निदानभूतानामितिहासानां संग्रहश्च भवति ।

यास्काचार्यात्पूर्व एव ऐतिहासिकवेदव्याख्यातारः अवर्तन्तेति निरुक्तस्थपरामर्शैर्ज्ञायते [५]। नैरुक्तपथिकोऽपि यास्काचार्यः प्रचरितपूर्वस्यास्य सम्प्रदायस्य व्यवस्थापितरूपेण प्रयोगः कृतवान् । अधुना उपलब्धेषु प्राचीनतममैतिहासिकव्याख्यानमपि निरुक्ते वर्तते । खण्डमात्रमत्रोदाहरति। 'अपागूहन्नमृतां......सरण्यूः।।'[६] इति ऋचः व्याख्याने यास्केनोच्यते यथा-' तत्रेतिहासमाचक्षते –

त्वाष्ट्री सरण्यू विवस्वत आदित्याद् यमौ मिथुनौ जनयाञ्चकार -सा सवर्णामन्यां प्रतिनिधायाश्वं रूपं कृत्वा प्रदुद्राव। स विवस्वानादित्य आश्वमेव रूपं कृत्वा तामनुसृत्य संबभूव। ततोऽश्विनौ जज्ञाते, सवर्णायां मनुः।' [७]इति।

वेदव्याख्यातृपरम्परायां यास्कस्यानन्तरकालीनाः ऐतिहासिकसम्प्रदायेन मन्त्रव्याख्यानं कृतवन्तोऽनेकाः वर्तन्ते । तेषु स्कन्दस्वामी, षड्गुरुशिष्यः ,वेङ्कटमाधवः,सायणाचार्यः इत्येतेषां व्याख्याः विद्वद्भिः सगौरवं निरीक्ष्यन्ते । ओल्दन्बर्ग् , ग्रिफित्, ग्रासमान्, गेल्ड्नर् ,सीग् इत्यादयः पाश्चात्यविद्वांसोऽपीतिहासानां साहाय्येन सूक्तानि व्याख्यातवन्तः भवन्ति।

## इतिहासाः आख्यानानि च

ऐतिहासिकसम्प्रदायस्य मूलभूता इतिहासाः आख्यानानि च अधुनापि वेदज्ञानां चर्चाविषयेषु मुख्यरूपेण अन्तर्भूतानि विद्यन्ते । सामान्यरूपेण इतिहासपदमाख्यातपदञ्च कथासूचके भवतः । यास्कः एतद्द्वयस्यापि प्रयोगः वैदिककथासाहित्यवाचित्वेनैव कृतवान् । मन्त्रव्याख्यावेलायां 'तत्रेतिहासमाचक्षत' इत्यस्मात्परः 'इत्याख्यानम्' इत्यस्मात्पूर्वञ्च वैदिककथासन्दर्भा एव निरुक्ते दृश्यते। इतिहासशब्दं शौनकः निर्ब्रवीति यथा – 'इतिहासः पुरावृत्तमृषिभिः परिकीर्त्यत' इति [८]। सूक्तानां दर्शने निदानभूतान् वृत्तान्तान् सूचयन्तः इतिहासाः भवन्तीति दुर्गाचार्येण निर्वचनरूपेण परामृष्टम् । यथोक्तं – 'निदानभूत इति हैवमासीदिति य उच्यते स इतिहास' इति[९]। एवं आख्यातेतिहासयोः सामान्यविशेषभावः सिद्ध्यते । ततोऽन्यत्र तु इतिहासाः केवलमर्थवादाः भवन्तीत्यपि दुर्गाचार्येणाभिप्रेतम्[१०]। एतदर्वाचीनैः साम्प्रदायिकपण्डितैरप्यङ्गीकृतम् ।

वेदेषूपस्थितानि आख्यानशैलीप्रकरणान्येव अन्यथा इतिहास इति शब्देन व्यवह्रियन्त इति रघुवीर् वेदालंकारमहाशयः [११]। शौनकः बृहद्देवतायां सूक्तानां प्रयुक्तशैलीनां बहूनां मध्ये प्रधानरूपेण 'आख्यानम्' अपि परामृष्टवान् [१२]। सूक्तानां प्रयोगे तन्त्रत्वेनैकेन आख्यानमुपयोक्तुम् ऋषय उद्युक्तवन्त इत्यस्मादेव आख्यानानां वेदार्थप्रकाशने साहाय्यकत्वम् दृश्यते । अतोऽपि तेषु तथ्यस्य अंशेन भवितव्य इति नियमः न वर्तते । 'उपोप मे परामृश..' इति मन्त्रे ऋषिः आख्यानशैलीं स्वीकृत्य रोमशायाः, तस्याः पत्युश्च इतिहासकल्पनां कृतवान् [१३]। एवं कल्पितकथानां स्वरूपं दीयते चेत् वैदिककथानां प्रामाण्यता अनिश्चिता जायते ।

ऐतिहासिकव्याख्यासम्प्रदायस्य चोदकत्वेन प्रतिष्ठिता अन्या शैली भवति संवादः । संवादशैल्यां संगृहीतान्यनेकानि सूक्तानि ऋग्वेदे द्रष्टुं शक्यन्ते यथा सरमा-पणिसंवादः उर्वशी-पुरूरवस्संवाद इत्यादीनि । यद्येते संवादाः कल्पितमूलाः भवन्ति चेत्तदनु प्रचलिताः ब्राह्मणेषु वेदानुक्रमणीषु च दृष्टा इतिहासा अपि कल्पितकथा एव भवितुमर्हन्ति । एतेषामितिहासानां चरित्रदृष्ट्या लब्धां प्रतिष्ठां

International Journal of Research in Economics and Social Sciences (IJRESS)
Available online at: http://euroasiapub.org
Vol. 7 Issue 8, August- 2017
ISSN(o): 2249-7382 | Impact Factor: 6.939 | Thomson Reuters Researcher ID: L-5236-2015

विचारोऽयं शोषयति । तथापि निदानभूतेभ्यस्तेभ्यः काले काले विकसिताः सञ्जाताश्च कथाः पुराणादिसाहित्यैः प्रसिद्धाः सत्यः देशकालादिप्रस्ताव्यतया चरित्रांशमावहन्त्येवेति वक्तव्यम् ।

**ऐतिहासिकपद्धतेः प्राधान्यम्**

वैदिकदेवतास्तुत्यादीनां स्वीकार्यता ऐतिहासिकसम्प्रदायेन अभिवृद्धिमाप्नुते। तथाहि मन्त्रैरुद्दिष्टं दैवतमधिकृत्य प्रचलितान्याख्यानानि सूक्तानामर्थपोषकानि सन्ति । ऋषिपरम्परायाः विषय अपि इतिहासाः समुपलभ्यन्ते भाष्येषु। ऋषीणां मन्त्रदर्शनं यावन्नीयमानाः सन्दर्भाः तेषु दरीदृश्यन्ते । एतादृशाः इतिहासाः वा कथालेशाः सूक्तानां भाष्येषु समुपकारकाः । वेदभाष्येषु सान्दर्भिकविषये ऐतिहासिकव्याख्यासम्प्रदायस्य प्राधान्यमिदं भवति ।

अस्याः पद्धत्याः निदानभूताः इतिहासाः, ब्राह्मणेषु वेदाङ्गेषु अनुक्रमणीग्रन्थेषु महाभारते पुराणेषु च परिणामदशां प्राप्यमाणाः सन्तः दृश्यन्ते । प्रतिग्रन्थं तेषामन्तरं आख्यानानां कालिकविकासस्य श्रेणीं सूचयति । एवं ग्रन्थाणां पौर्वापर्यविषये प्रतिदेशभिन्नताविषये चाप्येतत्सम्प्रदायः मापकः भवति । अनेन देशकालविषययोः ऐतिहासिकपद्धतेः प्रसक्तिः प्रकाश्यते ।

अयं सम्प्रदायः स्वभावेनैव कीर्णवैदिकसूक्तानामौचित्यभावं विशदीकरोति । सायणाचार्येण ऋग्वेदभाष्ये अमुं प्रयोजनं सूचयितुं सूक्तेभ्यः प्रागेव अनेकाः ऐतिहासिकशकलाः, बृहद्देवतादिग्रन्थनामानि तन्निदानत्वेन परामृश्य उद्धृताः , येषां साहाय्यं विना तादृशेषु सूक्तेषु औचित्यलाभः अनुवाचकेभ्यः न सम्भवत्येव । चरित्रदृष्ट्याऽपि ऐतिहासिकपद्धतेः प्रसक्तिः परामृष्टव्या । यतो हि सूक्तानां व्याख्यासु उद्धृतानि आख्यानानि तेषां निदानग्रन्थाश्च निरीक्ष्य सूक्तसंग्रहस्य कालः ,ऋषीणां देशादिकञ्चोपेक्षितुं सम्प्रदायोऽसावीषच्चेदप्युपकारकः । एतद्वारा वेदकालीनधर्मस्य दार्शनिकचिन्ताधारायाः सामाजिकव्यवस्थायाश्च परिच्छेदप्रकाशने विभावने वा अस्याः सरण्याः उपकारकत्वं साधनीयम् ।

अपि तु ऐतिहासिकवेदव्याख्यासम्प्रदायमवलम्ब्य प्रकाशिताः वेदव्याख्याः ‘तारतम्येतिहासशास्त्र’मित्याधुनिकविज्ञानशाखायाः उपोद्बलकाः भवन्ति ।

वेदस्यापौरुषेयत्वं स्थापयितुमिष्यमाणाः पण्डिताः ऐतिहासिकव्याख्यापद्धतेः अन्यतमाः दोषविमर्शकाः सन्ति । यतो हि सूक्तानां संबन्धे कालदेशव्यक्तिवृत्तान्तकल्पनया इतिहासाः तेषामनादित्वविघातकाः भवन्ति । इतरेऽप्यर्वाचीनविद्वांसः इमान् इतिहासान् पूर्णतया तादर्थ्ये स्वीकर्तुं सन्नद्धाः न भवन्ति । इतिहासेष्वन्तर्भूतान् गूढार्थानन्विष्यैव सूक्तेषु अर्थावगमार्थं ऐतिहासिकमार्गमवलम्बितुमुचितमिति रामगोपालमहाशयस्य मतम् [१४]। रघुवीरवेदालङ्कारमहाशयः ‘वैदिक् इतिहास् विमर्श्’इति ग्रन्थे इतिहासपक्षस्य दोषान् विस्तरेण सूचितवान् । ऐतिहासिकवेदव्याख्यापद्धतिरन्यैः व्याख्यापद्धतिभिः

सामञ्जस्यं न वहति बहुत्र इति तेषां मतानां सारः । किञ्च नैकेषु सन्दर्भेषु लौकिकदृष्ट्या व्याख्यायामितिहासनिरूपणं अनुवाचकान् मन्त्रार्थासङ्गतिं प्रति नयतीति तत्र विवक्षा [१५] । एवमस्य सम्प्रदायस्य दोषविमर्शा अपि दृश्यन्ते येभ्यः ज्ञायते यत् आध्यात्मिकव्याख्यायामिव इतिहासाननेकदृष्ट्या सम्यक् परिचिन्त्येतरेभ्यः सम्प्रदायेभ्योऽपि सारांशान् गृहीत्वा एव सरणीयं अनुगन्तव्या इति ।

.................................................................

**टिप्पणी ।**

(१) निरुक्ते खण्डौ २.१६; १२.१ च ऐतिहासिकपरामर्शपरौ; ।६.९; ७.१२ च नैदानपरामर्शपरौ ; १.१२; २.८.१४-१६; ३.८.१४ इत्यादयः खण्डाः नैरुक्तपरामर्शपराः; २.८ परिव्राजकपरामर्शपरः; ५.११; ७.४.२३; ११.२९.३१; १३.९ च याज्ञिकपरामर्शपराः; ९.५;३.९ च वैय्याकरणपरामर्शपरौ । वैय्याकरणसम्प्रदायस्तु सैद्धान्तिकपक्षे नैरुक्तव्याख्यापद्धत्यामेवान्तर्भवति ।

(२) निरुक्ते दुर्गटीका २.१६।

(३) राम्गोपाल् ,पुटः ५३, द हिस्टरी आँन्ड प्रिन्सिप्प्ल्स् आँफ वेदिक् इन्टर्प्रेटेशन्स् ।

(४) ऐतिहासिकव्याख्यापद्धतेः यथार्थप्रतिनिधिरयं निरुक्तात्पश्चात्कालीनग्रन्थः व्याख्यानोपयोजकानां मार्कि पञ्चाशद्वेदेतिहासानां कोशः भवति।

(५) निरुक्ते २.१६; १२.१; १२.१० ।

(६) ऋग्वेदे १०.१७.२ ।

(७) निरुक्ते १२.१० ।

(८) बृहद्देवतायां ४.४३।

(९) निरुक्ते २.१०, दुर्गटीका ।

(१०) निरुक्ते दुर्गटीका १०.२४। इतिवृत्तं परकृत्यर्थवादरूपेण यः कश्चिदाध्यात्मिक आधिदैविक आधिभौतिको वाऽर्थ आख्यायते दिष्ट्युदितावभासनार्थः स इतिहास इत्युच्यते स पुनरयमितिहासः सर्वप्रकारो हि नित्यमविवक्षितस्वार्थस्तदर्थप्रतिपत्तॄणामुपदेशपरत्वात्।

(११) रघुवीर् वेदालंकार् ,पुटसंख्या ८ , वैदिक् इतिहास् विमर्श् ।

(१२) बृहद्देवतायां १.३४-३९ ।

(१३) ऋग्वेदे १.१२६.७ ।

(१४) राम्गोपाल् , पुटसंख्या ५९ ।

**(१५)** रघुवीर् वेदालंकार् ,पुटाः १८-२०